International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(6): 86-89
© 2025 IJMH
www.themultijournal.com
Received: 05-12-2025
Accepted: 12-12-2025
Publish : 13-12-2025

**Dr. Parvathy V J**
Ph.D.,
National Sanskrit University,
Tirupati

**Correspondence:**
**Dr. Parvathy V J**
Ph.D.,
National Sanskrit University,
Tirupati

# सिद्धान्तबिन्दौ ब्रह्मणः शास्त्रैकगम्यत्वोपस्थापनम्

**Dr. Parvathy V J**

समेषामास्तिकदर्शनानां मणिरिव विराजमाने वेदान्तदर्शने अन्तर्गता मधुसूदनसरस्वतिश्रीचरणैः प्रणीता सिद्धान्तबिन्दुरिति प्रकरणग्न्थः। श्रीमच्छङ्कार्यचारविरचितस्य दशश्लोकीग्रन्थस्य गाम्भीर्यं ज्ञापयितुं तस्य व्याख्यारूपेण ग्रन्थोऽयं उपनिबद्धः। आचार्यकृतिनिवेशनेन स्वकीयस्य ग्रन्थस्य पवित्रता, उपादेयत्वं च भवतु इति धिया तथा दशश्लोकीग्रन्थस्य गभीरार्थस्य स्फुटावगमनाय च इमं ग्रन्थं मधुसूदनसरस्वतिश्रीचरणाः अरीरचन्।

अयं सिद्धान्तबिन्दुग्रन्थः वेदान्तशास्त्रारम्भसमर्थनेन आरभते। यतो हि वेदान्तशास्त्रं नारम्भणीयं विषयाभावात्, प्रयोजनाभावाच्च इति पूर्वपक्षिणां मतम्। अस्याक्षेपस्य खण्डनपूर्वकं वेदान्तमतस्य सप्रयोजनत्वं सप्रमाणकत्वं च उपस्थापयन्ति मधुसूदनसरस्वतिवर्याः। पूर्वपक्षिणः इत्थं तेषां मतम् उपस्थापयन्ति यत्- अज्ञातज्ञापनेनैव शास्त्रस्य प्रामाण्यं सिद्ध्यति, प्रमाणस्य अनधिगताबाधितार्थ-विषयकज्ञानजनकत्वात्। परन्तु वेदान्तशास्त्रं तु ज्ञातज्ञापकत्वेन अप्रमाणम्। 'शरीरं व्यावर्त्यते आत्मा तु अनुवर्तते' इति अनुमानप्रमाणेन, अनात्मभ्यः विवेकेन आत्मज्ञानम् अस्य वेदान्तशास्त्रस्य पठनात्प्रागेव सिद्ध्यते इत्यस्मात्। 'यः अहं बाल्ये पितरौ अन्वभूवं स एवेदानीमहं वृद्धावस्थायां प्रणतृननुभवामि' इति प्रत्यभिज्ञानात्, तथा 'व्यावर्त्यमानेषु शरीरेषु यत् व्यावर्त्यते तत् तेभ्यो भिन्नम्' इति लौकिकनियमाच्च। आत्मा तु अहङ्कारास्पदः, इदङ्कारास्पदमिदं शरीरम् इति शरीरात्मनोः भेदः वेदान्तशास्त्रपठनं विनैव वर्तते। वेदान्तशास्त्रमिदम् अप्रमाणम्, पूर्वमेव अनुमानप्रमाणेन शरीराद्यनात्मभ्यः विवेकेन सिद्धस्य आत्मनः अवबोधात्।

किञ्च शरीरादिव्यतिरिक्तात्मज्ञानेन मोक्षः इति यः सिद्धान्तः सःअयुक्तः। यतो हि अनुमानप्रमाणेन शरीरव्यतिरिक्तात्मज्ञानमस्ति इदानीम्। अस्य सत्त्वे अपि दुःखम् अनुवर्तते इत्यस्माद् निष्प्रयोजनत्वमेव अस्य शास्त्रस्य। शास्त्रस्य विषयः अज्ञातः भवेत् अन्यथा वैय्यर्थ्यं स्यात्, तथा शास्त्रस्य प्रयोजनमपि वक्तव्यम् तेन विना शास्त्रारम्भः अनुचितः। यस्मादस्य वेदान्तशास्त्रस्य ज्ञातज्ञापकत्वं, निष्प्रयोजकत्वं च तस्मादिदं नारम्भणीयम्। प्रतिवादिनां मतमुक्तं सिद्धान्तबिन्दौ यत्, 'ननु इदङ्कारास्पदेभ्यः अनात्मभ्यः विवेकेन अहङ्कारास्पदम् आत्मानं सर्वो लोकः अहमस्मि इति प्रत्येति, दुःखं च अनुभवति। तेन ज्ञातज्ञापकत्वात् निष्प्रयोजनत्वाच्च आत्मतत्त्वप्रतिपादनं व्यर्थम्[1]' इति।

इत्थं पूर्वपक्षे प्राप्ते, वेदान्तशास्त्रम् आरम्भणीयं, सप्रमाणात्, सप्रयोजनाच्च इति मधुसूदन-सरस्व-तिश्रीचरणाः सिद्धान्तबिन्दोः प्रारम्भे एव सोपपत्तिकम् उपस्थापयन्ति। शुक्तिरजतयोः भेदज्ञानिनः पुरुषस्यापि शुक्तिं दृष्ट्वा रजतभ्रमो जायते। 'इदं रजतम्' इति ज्ञानस्य विरोधिज्ञानं 'शुक्तिः रजतं न' इति ज्ञानं न, अपि तु 'इदं न रजतम्' इति ज्ञानम्। अस्य ज्ञानस्य सत्त्वे एव रजतभ्रमो निवर्तते। लक्षणं, लक्षणदृष्ट्या भेदः च ज्ञातेन पुरुषेण प्रतिभासतः भेदः अगृहीतः इत्यतः 'इदं रजतम्' इति तस्य अनुभवः।

तद्वत्प्रकृतेऽपि आत्मानात्मनोः लक्षणं, लक्षणदृष्ट्या भेदः च ज्ञायते चेदपि अध्यासवशात् अहं स्थूलः, अहं काणः इत्यादि प्रतिभासतः अभेदैव अवगाह्यते। अनुमानप्रमाणसत्त्वे अपि अनात्मभ्यः विवेकेन आत्मज्ञानं नास्ति, शरीरात्मनोः प्रतिभासतः तादात्म्यप्रतितेः सत्त्वात्। अत एव देहेन्द्रियमनसां तद्धर्माणां च आत्मनि आरोपः वर्तते। तथा अध्यासवशात् आत्मनि 'अहं दुःखी' इति दुखित्वाभिमानः क्रियते। प्रतिभासतः वैलक्षण्यं यदि न बुद्ध्यते तर्हि आत्मानात्मनोरविवेकः अनुवर्तते, ब्रह्मात्मैक्यज्ञानेनैव अस्य निवृत्तिः। ब्रह्मात्मैक्यज्ञानं तु वेदान्तशास्त्राधीनम्। तत्त्वमस्यादि-महावाक्यजन्याखण्डाकारान्तःकरणवृत्त्यवच्छिन्नचैतन्यरूपं यत् ब्रह्मात्मैक्यज्ञानं तेनैव समूलस्य अज्ञानसहितस्य दुःखित्वादिव्यवहारस्य निवृत्तिः आत्मनि सम्भवति। अतः अज्ञातस्य, प्रतिभासतः विलक्षणस्य ज्ञापकत्वेन अस्य शास्त्रस्य सप्रमाणकत्वम्।

किञ्च प्रतिभासतः अनात्मभ्यः आत्मज्ञानस्य अविवेकैव वर्तते। शास्त्रीयेण औपनिषदात्मज्ञानेनैव अनात्मनां देहेन्द्रियमनादीनां निवृत्तिः कर्तव्या। तदानीमेव मोक्षाख्यं प्रयोजनं सिद्ध्यति। आत्मा न प्रत्यक्षेगोचरः, 'न चक्षुषा गृह्यते नापि वाचा[2]' इति श्रुतेः। नानुमानप्रमाणगम्यः आत्मा, 'नैषा तर्केण मतिरापनेया[3]' इति श्रुतेः। अतः औपनिषदैकगम्यं ब्रह्म। श्री. बादरायणप्रणीते ब्रह्मसूत्रे शास्त्रयोनित्वाधिकरणे 'शास्त्रयोनित्वाद्[4]' इति सूत्रेण ब्रह्मणः उपनिषदैकगम्यत्वं सुष्ठु प्रपञ्चितमस्ति। 'तत्त्वमसि[5]', 'अहं ब्रह्मास्मि[6]' इत्यादि महावाक्यान्येव ब्रह्मप्रमापकानि। तदुक्तं सिद्धान्तबिन्दौ 'तस्य च आत्मतत्त्वस्य तत्त्वमसि, अहं ब्रह्मास्मि इत्यादिवेदान्तमहावाक्यमेव प्रमापकम्[7]' इति। उपनिषत्सु अन्तर्गतानि आत्मस्वरूपमात्रबोधकानि वाक्यानि महावाक्यनि। यस्माद्वेदान्तैकवेद्यमात्मतत्त्वं, तज्ज्ञानेनैव मुक्तिः, तस्मादस्य शास्त्रस्य सप्रयोजनत्वम्। अस्य वेदान्तशास्त्रस्य सप्रमाणकत्वात्, सप्रयोजनत्वाच्च इदं शास्त्रम् आत्मतत्त्वप्रतिपादनाय आरम्भणीयमेव इति सिद्धम्।

ब्रह्मणः शास्त्रैकवेद्यत्वात् तस्य साक्षात्काराय महावाक्येष्वन्यतमस्य तत्त्वमसीमहावाक्यस्य अर्थः अवगन्तव्यः। शास्त्रेणैव अस्य अर्थः ज्ञायते। वाक्यघटकपदानामर्थः ज्ञाते सति वाक्यं शाब्दबोधं जनयति। वाक्यं च पदार्थोपस्थितिद्वारैव स्वार्थं ज्ञापयति। उक्तं च न्यायसिद्धान्तमुक्तावल्याम्-

**'पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।**

**शाब्दबोधः फलम् तत्र शक्तिधीः सहकारिणी'**।। इति।

प्रकृते आत्मैकत्वविज्ञानाय तत्त्वमसीमहावाक्यस्य अर्थः ज्ञातव्यः। तदर्थं तत्त्वमसीवाक्यघटकयोः तत्त्वं पदयोः अर्थः प्रथमं अवगन्तव्यः। अनयोरर्थः न लौकिकप्रमाणेन ज्ञायते, किन्तु शास्त्रैकगम्यः। तदुक्तं, 'तत्त्वम्पदार्थयोः प्रकृतवाक्यार्थानुकूलयोरन्यतः असिद्धत्वात्तावपि शास्त्रेणैव प्रमातव्यौ[8]' इति। यथा यूपाहवनीयौ कौ इति शास्त्रेणैव प्रमातव्यौ तथा तत्त्वम्पदयोरर्थः अपि शास्त्रैकगम्यः। यथा तक्षणादिसंस्कारकर्मविधायकस्य 'यूपं तक्षति', इत्यादिवाक्यस्य पर्यालोचनया न केवलः काष्ठः यूपपदवाच्यः अपि तु तक्षणादिजन्यसंस्कारविशिष्टकाष्ठः इति निर्णीयते। यथा वा नाग्निसामान्यमाहवनीयार्थः किन्तु 'वसन्ते ब्राह्मणोऽग्नीनादधीत' 'नक्तं गार्हपत्यमादधाति दिवाऽऽहवनीयः' इत्यादिवेदवाक्यपर्यालोचनेन दिवाधानादिसाध्याग्न्यादिकम् आहवनीयादिपदस्य अर्थः इति बुध्यते।

तद्वत् 'यतो वा इमानि भूतानि जायन्ते[9]' इति श्रुत्या जगज्जन्मादिकारणविशिष्टं चैतन्यं तत्पदस्य वाच्यार्थः इति अवगम्यते। यतः ब्रह्मणः सकाशात् दृश्यं सर्वं कार्यम् उत्पद्यते, जातानि सर्वाणि यस्मात् सत्ताप्रकाशादिकं प्राप्नुवन्ति, अन्ते च सर्वाणि यस्मिन् एकात्मतां भजन्ते तत्ब्रह्म तत्पदस्य वाच्यार्थः। 'ब्रह्मविदाप्नोति परम्[10]' इति श्रुत्या शुद्धब्रह्मविषयकज्ञानस्य मोक्षसाधनत्वं प्रतिपादितम्। शुद्धं ब्रह्म किमिति जिज्ञासायां 'सत्यं ज्ञाननमनन्तं ब्रह्म[11]' इति श्रुतिरागता। अतः शुद्धं चैतन्यमेव तत्पदस्य लक्ष्यार्थेति अनया श्रुत्या बुद्ध्यते। तर्हि तत्पदस्य वाच्यार्थः जगत्कारणत्वविशिष्टं ब्रह्म। तत्पदस्य लक्ष्यार्थस्तु शुद्धं ब्रह्म।

'तद्यथा महामत्स्यः उभे कूले अनुसञ्चरति पूर्वं चापरं च, एवमेवायं पुरुषः एतौ उभौ अन्तौ अनुसञ्चरति स्वप्नान्तं च बुद्धान्तं च[12]' इति श्रुतिः त्वम्पदस्य वाच्यार्थसमर्पिका। अर्थात् महामत्स्यः कदाचित् पूर्वं तटं प्राप्नोति, पश्चात् अपरं तटं प्राप्नोति, न तटेन सङ्गः तस्य। तद्वत् जीवः जाग्रत्सवप्नावस्थाभ्यां सञ्चरति। सुषुप्त्यवस्थां विचारं विना ज्ञातुमशक्यत्वात् जाग्रत्स्वप्नौ सर्वे जानन्तीत्यतः च अस्यां श्रुतौ अवस्थाद्वयमेव निर्दिष्टम्। अवस्थात्रयविशिष्टः जीवः त्वम्पदस्य वाच्यार्थः। 'न दृष्टेर्द्रष्टारं पश्येः[13]', योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः[14] इति श्रुतिभ्यां त्वम्पदस्य लक्ष्यार्थः समर्प्यते। 'न दृष्टेर्द्रष्टारं पश्येः[15]' इत्यनया श्रुत्या यद्यपि दृष्टेः, दृष्टिविषयस्य च द्रष्टा भवति जीवः तथापि दृष्टेः द्रष्टारं द्रष्टुं सः असमर्थः इति उच्यते। यतो हि दृष्टेः द्रष्टास्तु स्वप्रकाशचैतन्यम्। तस्य ज्ञानाय न प्रमाणान्तरापेक्षा। तच्चैन्यमेव त्वम्पदस्य लक्ष्यार्थः। बृहदारण्यकोपनिषदि 'किं ज्योतिरयं पुरुषः[16]' इति जीवस्य व्यवराहप्रयोजकं ज्योतिः किमिति प्रश्नसन्दर्भे भानुचन्द्राग्न्यादीन् निराकृत्य 'आत्मैवास्य ज्योतिर्भवति[17]' इति उक्तम्। तत्र इन्द्रियादिसङ्घातमध्ये आत्मा कः इति शुद्धब्रह्मस्वरूपे आकाङ्क्षायां 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः[18]' इति श्रुत्या निर्दिष्टम्। अर्थात् यः अन्तःकरणधर्मेण धर्मवान्, तथा इन्द्रियधर्मेण धर्मवान् इव लक्ष्यते

सः आत्मा। इन्द्रियादिव्यतिरिक्ततया यत् स्वप्रकाशं शुद्धं चैतन्यं वर्तते तदेव त्वम्पदस्य लक्ष्यार्थः। तर्हि त्वमदस्य वाच्यार्थः अवस्थात्रय-विशिष्टः जीवः। त्वम्पदस्य लक्ष्यार्थस्तु शुद्धं ब्रह्म इति सिद्धम्। तत्त्वमसीमहावाक्यान्तर्गतपदानामर्थः ज्ञातः। तस्य वाक्यार्थः अवगन्तव्यः।

प्रकृते उपस्थापिताः चतस्रः श्रुतयः याः तत्त्वम्पदयोरर्थसमर्पिकाः ताः सर्वाः अपि अवान्तरवाक्यश्रुतयः। अत्र महावाक्यघटकी-भूतपदार्थसमर्पकेभ्यः अवान्तरवाक्येभ्यः तत्त्वम्पदयोरर्थः ज्ञातः। तयोः पदयोः वाच्यार्थयोः अभेदस्य अनुपपन्नत्वेन मुख्यार्थं परित्यज्य लक्षणास्वीकारेण लक्ष्यार्थस्य स्मरणं भवति। लक्ष्यार्थस्य स्मरणस्तु निर्विकल्पकम्। निर्विकल्पकस्मरणस्य कारणं निर्विकल्पकः अनुभवः। तस्मात् महावाक्यस्यैव न संसर्गाविषयकज्ञानजनकत्वरूपम् अख-ण्डार्थबोधकत्वम् अपि तु अवान्तरवाक्यस्यापि अखण्डार्थबोधकत्वं वर्तते इति सिद्धम्।

ननु अवान्तरवाक्येभ्यः शुद्धचैतन्यस्यानुभवो जातः। तन्मूलकं महावाक्यस्थपदैः जातं शुद्धस्मरणम्। किन्तु अवान्तरवाक्य-स्थप-देभ्यः शुद्धस्य स्मृतिरनुपपन्नः, तत्प्राक् शुद्धचैतन्यस्य अननुभ-वात्। इत्थम् अवान्तरवाक्येभ्यः निर्विकलप्कः शाब्दबोधो भवती-त्यत्र विप्रतिपत्तौ सत्यां प्रकारान्तरं स्वीक्रियते सिद्धान्तिना। यस्माद् अस्मप्रज्ञातसमाधौ, सुषुप्तौ च निर्विकल्पकशुद्धचैतन्यानुभवो वर्तते, तस्मात्तत्रानुभूतस्य शुद्धचैतन्यस्य अवान्तरवाक्यस्थपदेभ्यः निर्विक-ल्पकं स्मरणम् उपपद्यते। वार्तिककारमते सुषुप्तौ अपि न शुद्ध-चैतन्यानुभवः इत्यतः मार्गान्तरं उपादत्ते सिद्धान्तिना।

'घटः घटत्वजातिविशिष्टः' इति वाक्यप्रयोगकाले यद्यपि घटपदस्य घटत्वविशिष्टे शक्तिः तथापि शाब्दबोधानुपपत्तौ सत्यां विशेष्यमात्रं तात्पर्यानुसारेण प्रतीयते इति स्वीकृत्य वाक्येऽस्मिन् घटपदस्य घटव्यक्तिरित्यर्थः सिद्ध्यति। यथा अस्मिन् वाक्ये तात्पर्यानुसारेण अर्थनिर्णयः कृतः तथा तत्त्वमस्यादिवाक्यस्य अर्थवर्णने तात्पर्यानु-सारेण विशेष्यमात्रे संस्कारोद्बोधो जायते। 'सत्यं ज्ञानमनन्तं ब्रह्म[19]' इत्यादिवाक्यानां विशिष्टे ब्रह्मणि तात्पर्यं चेदपि महावाक्यार्थबोध-जननावसरे तात्पर्यानुसारेण विशेष्यमात्रस्य विशेष्यमात्रे चैतन्ये संस्कारोद्बोधः भवति। अवान्तरवाक्येभ्यः निर्विकल्पकशाब्द-बोधोत्पत्तौ सन्देहे, सुषुप्तौ शुद्धचैतन्यस्यानुभवास्वीकारे, सत्यज्ञाना-दिपदानाम् उपाधिविशिष्टचैतन्ये एव शक्तिरित्यादिस्वीकारे तत्त्व-मस्यादि वाक्यस्य तात्पर्यानुसारेण विशेष्यमात्रे चैतन्ये संस्कारो-द्बोधो जायते। तेन स्मरणं जायते। तार्किकसम्मतं मतमिदम्। तदुक्तम्, 'इच्छन्ति ह्याकाशादिपदादपि निर्विकल्पकं स्मरणम्। तात्पर्याधी-नत्वाच्छब्दवृत्तेः[20]' इति। अर्थात् आकाशशब्दस्य आकाशत्व-विशिष्टमिति वाच्यार्थः। यतः आकाशत्वं शब्दाश्रयत्वं ततः आकाशशब्दः शब्दाश्रयत्वविशिष्टः इत्यर्थः। 'आकाशः शब्दाश्रयः' इति वाक्ये आकाशपदस्य शब्दाश्रयत्वविशिष्टमिति स्वीकारे शाब्दबोधानुपपत्तौ आकाशशब्देन व्यक्तिमात्रं तात्पर्यानुसारेण उपादाय आकाशपदस्य अकाशव्यक्तिरित्यर्थः प्राप्यते। शब्दवृत्तिः शक्तिः वा लक्षणा वा गौणी वा या कापि वृत्तिः भवतु, तात्पर्यानुसारेण तया तया वृत्त्या अर्थः उपस्थापनीयः। यदि तात्पर्यं व्यक्तिमात्रबोधकं तर्हि तदंशे एव संस्कारोद्बोधः, स्मरणं च भवति। तर्हि अवान्तरवाक्यस्यापि निर्विकल्पकशाब्दबोधजनकत्वं वर्तते। सुषुप्तौ, असम्प्रज्ञातसमाधौ च निर्विकल्पकं शुद्धं चैतन्यमेव भासते। सुषुप्तौ शुद्धस्यानुभवः नास्तीति स्वीकारे अपि तात्पर्यानुसारेण शुद्धस्य उपस्थितिः भवतीति समाधनत्रयं प्रपञ्चितम्। अनेन सर्वस्मिन्नपि ज्ञाने प्रमितिप्रमात्रादि त्रिपुटी भासते इति नव्यप्राभाकरमतस्य निराकरणपुरस्सरं तात्पर्यानुरोधेन महावा-क्यार्थजन्यबोधे त्रिपुटी न भासते, केवलं निर्विकल्पकं ब्रह्मैव भासते इति सिद्धान्तितम्।

अवान्तरवाक्यस्यापि अखण्डार्थबोधजनकत्वात् न महावाक्यस्य ज्ञातज्ञापकत्वम्। अच्यते च सिद्धान्तबिन्दौ - 'पारोक्ष्यसद्वितीय-त्वाभ्यां च न तत्त्वम्पदार्थमात्रानुभवादेव कृतकृत्यता[21]' इति। अर्थात् अवान्तरवाक्यैः तत्त्वम्पदयोरर्थावगमनं न अपरोक्षं, किन्तु परोक्षम्। तत्पदस्य लक्ष्यार्थः एकः, त्वम्पदस्य लक्ष्यार्थः एकः इति परोक्षज्ञानमेव अवान्तरवाक्येभ्यः भवति, न अनयोः अद्वितीयत्वांशः विषयीकृतो भवति। महावाक्येन अपरोक्षज्ञानं जायते, आत्मनः अद्वितीयत्वं च अवगम्यते, तदानीमेव कृतकृत्यता। तत्पदस्य त्वम्पदस्य च चैतन्यमित्यर्थस्वीकारे पौनरुक्त्यं स्यादिति पूर्वपक्षे प्राप्ते, तं प्रति ब्रूमः - 'वाच्यार्थभेदावभासान्न पौनरुक्त्यम्[22]' इति। अर्थात् प्रकृते लक्षणया उपस्थितयोरभेदे सत्यपि लक्षणाप्रवृत्तेः पूर्वं प्रवृत्ते शक्यार्थोपस्थितौ भेदः वर्तते। वाक्यश्रवणानन्तरं शक्यार्थ-भेदस्य अनुपपत्तौ सत्यां तात्पर्यानुसारेण लक्ष्यार्थः स्वीकृतः। अतः वाच्यार्थस्य भेदावभासः प्रथमं वर्ततेत्यतः न त्वम्पदस्य पौनरुक्त्यम्। तार्किकमते निर्विकल्पकानुभवस्य न प्रमात्वं न वा भ्रमत्वम्। इह मधुसूदनश्रीचरणाः अस्यैव निर्विकल्पकानुभवस्य प्रमात्वेन अज्ञान-निवर्तकत्वम् उच्यते। तार्किकमतानुसारं तद्वति तत्प्रकारकज्ञानं प्रमा। किन्तु वेदान्तमते अबाधितार्थविषकत्वेनैव ज्ञानस्य प्रमात्वम्। यदि तत्त्वमसीत्यादिमहावाक्यजन्यबोधे आत्मनि विशेषणतया किञ्चित् भासते तर्हि तस्य विशेषणस्य, विशेषणसंसर्गस्य च ब्रह्मभिन्नत्वेन मिथ्यात्वम् इष्टम्। तयोः बाधितत्वात् तद्विषयकज्ञानस्य बाधित-विषयकत्वात् च भ्रमत्वम् आयाति। यदि तत्त्वमस्यादिज्ञानस्य

शुद्धब्रह्मविषयकत्वस्वीकारः, शुद्धब्रह्मणः अबाधितत्वाद् तस्य ज्ञानस्य आबाधितार्थविषयकत्वेन प्रमात्वं सिद्ध्यति। अनेन पारमार्थिकतत्त्वावेदकत्वलक्षप्रमाज्ञानेनैव अज्ञाननिवृत्तिः संभवति। 'प्रमयैवाज्ञाननिवृत्तिः न भ्रमेण' इति नियमात्।

तत्त्वमस्यादिमहावाक्यैः लक्षणया यः अखण्डार्थः प्रतीयते तस्मिन् ज्ञानविषये अर्थे लक्ष्यतावच्छेदकं भासते न वेति सन्देहस्य निवारणं वर्तते सिद्धान्तबिन्दौ। लक्ष्यतावच्छेदकं न भासते। स्वरूपं यदा लक्ष्यते तदा प्रकारतया लक्ष्यतावच्छेदकस्य भानं न भवति। लक्ष्यतावच्छेदकस्वीकारे अप्रयोजकत्वात्, अननुभवाच्च। शुद्धे चैतन्ये एव तात्पर्यमित्यतः तात्पर्यावच्छेदस्य अभाने न काप्यननुपपत्तिः। अतः लक्ष्यतावच्छेदकभानमन्तरेणापि लक्षणा उपपद्यते, तात्पर्याधीनत्वात् शब्दवृत्तेः। तदुक्तं सिद्धान्तबिन्दौ- 'प्रकृतवाक्यार्थानुकूलपदार्थोपस्थितेरेव शक्तिलक्षणासाध्यत्वात्[23]' इति। अर्थात् शक्त्या वा लक्षणया वा प्रकृतवाक्यार्थोपयोगिपदार्थः बोधनीयः। प्रकृतवाक्यार्थोपयोगिपदार्थः तात्पर्यानुसारेण निर्णेतव्यः। प्रकृतवाक्यार्थोपयोगिनि शुद्धे चैतन्ये न कोऽपि प्रकारः शक्त्या वा लक्षणया वा भासते। तर्हि शक्यतावच्छेदकं, लक्ष्यतावच्छेदकं च न बोधनीयं, अप्रयोजकत्वात्। तात्पर्यं यत्र वर्तते सः पदार्थः एव शक्त्या वा लक्षणया वा उपस्थापनीयः।

तर्हि वेदान्तमहावाक्यान्येव शुद्धचैतन्यस्य प्रमापकानि इति सिद्धम्। ब्रह्मणः उपनिषदैकगम्यत्वात्, वेदान्तशास्त्रज्ञानाधीनमहावाक्यघटकपदानामर्थावगमनद्वारा एव संसर्गाविषयकः निर्विकल्पकः शाब्दबोधो जायते। तादृशाखण्डार्थब्रहमज्ञानेनैव अत्यन्तिकदुःखनिवृत्तिरूपस्य मोक्षाख्यस्य पुरुषार्थस्य साक्षात्कारो भवति। यस्मात् ब्रह्म औपनिषदं तस्मात् ब्रह्म ज्ञानाय वेदान्तशास्त्रमिदमारम्भणीयमेव इति सिद्धम्।।

**सङ्केताक्षरसूची**

| | |
|---|---|
| क.उ | कठोपनिषद् |
| छा.उ | छान्दोग्योपनिषद् |
| तै.उ | तैत्तिरीयोपनिषद् |
| बृ.उ | बृहदारण्यकोपनिषद् |
| ब्र.सू | ब्रह्मसूत्रम् |
| मु.उ | मुण्डकोपनिषद् |
| सि.बि | सिद्धान्तबिन्दुः |

**अनुशीलितग्रन्थसूची**


- कठोपनिषद्, शाङ्करभाष्यसहिता, गीता प्रेस्, गोरखपुर्
- छान्दोग्योपनिषद्, शाङ्करभाष्यसहिता, गीता प्रेस्, गोरखपुर्, 2019
- तैत्तिरीयोपनिषद्, शाङ्करभाष्यसहिता, गीता प्रेस्, गोरखपुर्
- दशोपनिषदः, आनन्दाश्रममुद्रणालयः, 1937
- ब्रह्मसूत्रशाङ्करभाष्यम्, श्रीशङ्करभगवत्पादाः, कामकोटिकोशस्थानम्, चेन्नै, 2008
- मुण्डकोपनिषद्, चौखम्बा संस्कृत संस्थानम्, 2012
- सिद्धान्तबिन्दुः, मधुसूदनसरस्वतिश्रीचरणाः, महेश- अनुसन्धानसंस्थनम्, वाराणसी


**सन्दर्भ**

1. सि.बि.पृ.सं.4
2. मु.उ.3.1.8
3. क.उ.1.2.9
4. ब्र.सू.1.1.3.1
5. छा.उ.6.8.7
6. बृ.उ.1.4.10
7. सि.बि.पृ.सं.7
8. सि.बि.पृ.सं.11
9. तै.उ.3.1.1
10. तै.उ.2.1.1
11. तै.उ.2.1.1
12. बृ.उ.4.3.18
13. बृ.उ.3.4.2
14. बृ.उ.4.3.7
15. बृ.उ.3.4.2
16. बृ.उ.4.3.2
17. बृ.उ.4.3.6
18. बृ.उ.4.3.7
19. तै.उ.2.1.1
20. सि.बि.पृ.सं.15
21. सि.बि.पृ.सं.20
22. सि.बि.पृ.सं.20
23. सि.बि.पृ.सं.30